# श्रीकुञ्जबिहारी-अष्टक

यः स्तूयते श्रुतिगणैर्निपुणैरजस्त्रं,
सम्पूजयते क्रतुगतैः प्रणतैः क्रियाभिः।
तं सर्वकर्मफलदं निजसेवकानां,
श्रीमद्विहारिचरणं शरणं प्रपद्ये ।। 1 ।।

यं मानसे सुमतयो यतयो निधाय,
सद्यो जहुः सहृदया हृदयान्धकारम्।
तं चन्द्रमण्डलनखावलिदीप्यमानं,
श्रीमद्विहारिचरणं शरणं प्रपद्ये ।। 2 ।।

येन क्षणेन समकारि विपद्धियोगो,
ध्यानास्पदं सुगमितेन नुतेनविज्ञै।
तं तापवारण निवारण सांकुशांकं,
श्रीमद्विहारिचरणं शरणं प्रपद्ये ।। 3 ।।

यस्मै विधाय विधिना विधिनारदाद्याः,
पूजां विवेकवरदा वरदास्यभावाः।
तं दाक्षलक्षण–विलक्षण–लक्षणाढ्यं,
श्रीमद्विहारिचरणं शरणं प्रपद्ये ।। 4 ।।

यस्मात् सुखैकसदनान्मदनारिमुख्याः,
सिद्धिं समीयुरतुलां–सकलांगशोभाम्।
तं शुद्धबुद्धि–शुभवृद्धि–समृद्धि–हेतुं,
श्रीमद्विहारिचरणं शरणं प्रपद्ये ।। 5 ।।

यस्य प्रपन्नवरदस्य प्रसादतःस्यात्,
तापत्रयापहणं शरणं गतानाम्।
तं नीलनीरजनिभं जनिभञ्जनाय,
श्रीमद्विहारिचरणं शरणं प्रपद्ये ।। 6 ।।

यस्मिन् मनोविनिहितं भवति प्रसन्नं,
खिन्नं कतिन्द्रियगणैरपि यद्विषण्यम्।
तं वास्तवस्यवनिरस्तसमस्तदुःखं,
श्रीमद्विहारिचरणं शरणं प्रपद्ये ।। 7 ।।

हे कृष्ण पादशमितातिविशादभक्त–
वाञ्छाप्रदामरमहीरूहपञ्चशाख ।
संसारसागरसमुत्तरणे वहित्रः,
हे चिह्नचित्रितचरित्र नमो नमस्ते ।। 8 ।।

इदं विष्णोः पादाष्टकमतिविषादाभिशमनं,
प्रणीतं यत्प्रेम्णाा सुकविजगदीशेन विदुषाः।
पठेद् यो वा भक्त्याऽच्युतचरणचेताः समनुजो,
भवे भुक्त्वा भोगान भिसरति चान्ते हरि पदम्।।

Phone : +91-565-2444858, +91-9897233358, 9897919717
Email : info@bankeybihari.info, brijbhakti@yahoo.co.in
website : www.bankeybihari.info